सं० ४८४८

नाम— ज्ञानार्णवे बालादेवीपटलम्

कर्त्ता — x

पत्र सं० — ९ पत्राणि सं० x

विषयः— तंत्रम्

बालादेवीपटलम् ज्ञानार्णवे

४८ ४८

4848

F. = 9

ॐ नमो भगवत्यै श्रीबालायै अथ श्रीबालाभग
वतीपटलः श्रीदेव्युवाच गणेशनंदिचंडेशभृङ्गिरे
शादिवारित जगद्वंद्यगणाधीशाकिं त्वया जप्य
ते सदा अक्षमालेति किं नाम सेशा यो मे हृदि स्थि
तः शब्दातीतं परं ब्रह्म त्वमेव परमार्थवित् क
थयानंदनिष्यंद सांद्रमानसनिश्चयात् ईश्वर
उवाच कथयामि वरारोहे यन्मया जप्यते सदा
अकारादिक्षकारांता मातृकावर्णरूपिणी व
त्वदेशस्वरोपेता बिंदुत्रयविभूषिता अनुस्वा
रेण देवेशि बिंदुनैकेन मंडिता विसर्गेण च
बिंदुभ्यां सम्यग्भ्यां विराजिता कलामंडलमा
स्थाय शक्तिरूपं महेश्वरि ककारादिक्षकारांता
वर्णास्तु शिवरूपिणः व्यंजनत्वात्सदानंदे नो
च्चारं सहते यतः उच्चारे स्वरसंभिन्नास्तदा देवि
न संशयः पंचाशद्वर्णभेदेन शब्दाख्यं वस्तु संभवते
अकारः प्रथमं देवि क्षकारोंत्यस्ततः परं अक्षमा
लेति विख्याता मातृकावर्णरूपिणी शब्दब्रह्मस्व
रूपेयं शब्दातीतं न जप्यते शब्दातीतं परं धाम
गणनारहितं सदा आत्मस्वरूपं जानीहि देवि श
स्त्रपरमेश्वरः आस्मिन्नेव परे तत्त्वे बिंदुत्रयविभू

अनुस्वारस्य ले
ख्याकृतिमाह
बिन्दुनेति एवं
मग्रे बिन्दुभ्यांमिति
विसर्गस्य लेख्या
कृतिपरं ● वोध्यं

रसहिता

बिन्दुत्रयम् बिनत्यमेव
विद्धि श्रोति अनुस्वारेति

कलाः
षोडश ...
अकारादयः स्वराः
तेषां मण्डलं समूहः
तच्छक्तिरूपः तमाश्रि
त्य शिवरूपेका यावः तिष्ठं
ति तथा च नैते स्वयं व्य
ञ्जनस्योच्चारणमभि
भवतीति भाष्यम्

अंत

विना

ॐ प.

सर्गो विसर्गः तद्रूपाभ्यां बिन्दुभ्यां पातु

भूषिते मातृकासंपुटत्वेन संस्थिते व्युत्क्रमान
से बिंदुत्रयं प्रवक्ष्यामि बीजरूपं वरानने हका
रे बिंदुरूपेण ब्रह्माणं विद्धि पार्वति सकारे स-
र्गे बिंदुभ्यां हरिमोहेश्वरेश्वरि अविनाभाविसं
बद्धा लोके हरिहराविति ब्रह्मबिंदुर्महेशा
नि वामा शक्तिर्निगद्यते विष्णुं वमति यत्तत्त्वा
मेयं परिकीर्तिता ज्येष्ठा रुद्रे स्ववीर्यशक्तिः पा
लयंती जगत्ततः ततो रौद्री ग्रसंती तु क्रमेण य
देश्वरि एवं बिंदुत्रयं विद्धि गुणत्रयविभूषितं
बिंदुशब्देन मूर्त्यंतं तथापि गुणसूचकं इच्छा
ज्ञानक्रियारूपं भूर्भुवः स्वः स्वरूपकं स्वरत्रया
त्मकं विद्धि तत्त्वत्रयमयं प्रिये बिंदुत्रये महेशा
नि सर्वमेतत्प्रतिष्ठितं अंबिका बिंदुमिदं वि
गुणत्रयपरापरा जाग्रत्स्वप्नसुषुप्तिस्थं बिंदु
त्रयं भवांप्रिये जाग्रत्स्वगुणप्रोक्ता केवलं
शक्तिरूपिणी मनोव्याहृतिविस्तारा सुखदुः
खाभिलाषिणी शिवरूपा सुषुप्तिस्था सर्वव्याहृ
तिहारिणी देहधर्मपरित्यक्ता निरभिलाषवर्त
तिनी तमोगुणमयी कर्मग्रसंती मोदरूपिणी
सुषुप्त्यंते जागरादौ स्वप्नावस्था रजोमयी उभ-

चकारो विपरीतक्रमः अह मित्यस्यानन्तरं बोध्यः

यैर्लक्षणैप्रोक्तास्तल्लक्षणलक्षिता अवस्था
त्रयमेतन्नु कथितं बिंदुसंभवे एतस्मिन्नेव वेला
नेतुर्यावस्था शृणु प्रिये निद्रादौ जागरस्यांते
स्फुरत्तोभावः स्फुरन्नामात्रलक्षणा अवस्थापंक्तितासामा
तुर्यावस्था परा कला भावाभावपरित्यक्तागु
णातीतातु निष्कला इयमेव महादेवि मनसा
प्राप्यतेतदा उन्मनीनाम सद्रूपा ज्ञानवल्लीवि
राग= दात्मका बिंदुत्रये सनादेन प्रस्तुताकंदरूपि
णी बिंदुत्रयसमायोगात्रिपुरानाम रूपिणी
वर्णातीता सवर्णापि केवलंज्ञानविक्कला
एतांविद्यांसमाराध्य सर्वज्ञेमम प्रिये उपा
सते मयादेवि त्रिपुरावाद्रमालया इति श्री
ज्ञानार्णवे नित्यातंत्रे प्रथमः पटलः श्रीदेव्युवा
च त्रिपुरापरमेशानी ज्ञानमार्गेण सूचिता
मंत्ररूपेण कथय यद्यहं तववल्लभा त्रिपुरायाः
प्रकारस्य मंत्रभेदस्य को विधिः सर्वतंत्रोत्तमि
क्रामियेन सौभाग्यमाप्नुयात् श्रीईश्वर उवाच
त्रिपुरात्रिविधादेवि बालातः प्रथमा शृणु
ययाविज्ञानयादेवि साक्षात्स्मरगुरुर्भवेत्

बा॰प॰
२

सूर्यस्वरंसमुच्चार्यबिंदुनादकलात्मकं स्वरां
तेष्टपृथिवीसंस्थंतुर्यस्वरसमन्वितं बिंदुनाद
समाक्रांतंसर्गवान्भृगुरव्ययः शाक्रस्वरसमो
पेतोविधेयेस्मत्वरीमता प्रकाशं ऐंक्लींसौः
त्रिपुरायैनमः इतिप्रकाशः गंगातरंगक
ल्लोलवाग्मित्वप्रदायिनी महासौभाग्य
जननीमहासारस्वतप्रदा महासौंदर्यसु
भगामहामृत्युविनाशिनी ब्रह्मविष्णुहरे
न्द्रादिवंदितापापहारिणी सर्वतीर्थमयी
देवीसर्वरत्नप्रदायिनी महामोक्षप्रदानि
त्यमहाभोगप्रदासदा वक्त्रकोटिसहस्रैस्तु
जिह्वाकोटिशतैरपि नशक्यतेवर्णयितुं
विधेयंमत्वरीपरा पंचवक्त्रेणजिह्वाभिः पं
चभिर्नैवशक्यते वाग्भवेनैडमहसावागी
शत्वप्रदायिनी कामराजेनबीजेनशाक्रगो
पस्फुरत्त्विषा त्रैलोक्यमोहयंतीयशाक्तिबी
जेनस्वयंते स्फुरत्स्वर्णवर्णेनसौभाग्यंत
स्यमंदिरे एनस्याःसाधनंदेविकथयामिस
मासतः प्रातरुत्थायदेवेशिब्रह्मरंध्रेनिजे

गु

2

गृहे स्नात्वा देवी मयोक्तानन्त्रभापटलाहणः
स्नानकर्म ततः कुर्यान्मूलमंत्रं स्मरन्बुधः त्रिवा
रं मं जलैर्वारिमंत्रयित्वा तु मूर्धनि निक्षिपेत्
महेशानि त्रिराचम्य वतर्पयेत् त्रिधा वशोदत्वा
देहे सूर्यायार्घ्यं निवेदयेत् मूलमंत्रेण वा
सूर्यमंत्रेण वा प्रिये शिवबीजं वाह्निसंस्थं वाम
नेत्रेण भूषितं बिंदुनादसमायुक्तं हंसः पदम
प्यालिखेत् अनेन मनुना देवि सूर्यायार्घ्यं नि
वेदयेत् यथोक्तां तु जपेत्संध्यां गायत्रीं परमाद्
रा मूलविद्यां समुच्चार्य वागीश्वरि च विद्महे द्वि
तीयं बीजमुच्चार्य कामेश्वरि च धीमहि तृतीयं
बीजमुच्चार्य तन्नः शक्तिः प्रचोदयात् यथाश
क्ति जपेत्संध्यां यागमंडलमाविशेत् यातनांख
विधानांरंगांगांवयमुनां तथा द्वारश्रियं देह
लीं च पुरुषं वास्तुसंज्ञकं संपूज्य परमेशानि
पूजयेदासनं बुधः मायाबीजं समुच्चार्य तत
आधारपूर्वकं शक्तीति पदमालिख्य कमलास
नमालिखेत् ऊँ तेन नमः पदं कृत्वा आसनं स्मम
नुः प्रिये उपविश्य ततो देवि भूतानां संत्रासये

वा.प. २

ततः भूतशुद्धिविधिं कुर्यात्प्राणायामक्रमेण
तु वायुबीजं समुच्चार्य षट्कोणादागतं महत् ५
कृष्णवर्णं महेशानि शोषयेत्तेन वै ततु प्राम
ने सम्यगासीनो वामेनापूर्य चोदरं कुंभकेन
त्रिराहत्य दक्षिणेन रेचयेत् कनिष्ठानामि
३ काङ्गुष्ठैर्यत्नासापुटधारणं प्राणायामः स वि
ज्ञेयस्तर्जनीमध्यमे विना वामकुक्षिस्थितं पा
पपुरुषं कज्जलप्रभं ब्रह्महत्याशिरस्कं च स्वर्ण
स्तेयभुजद्वयं खड्गचर्मधरं क्रुद्धं पापं कुक्षौ
विचिंतयेत् शोषयेत्तेन बीजेन देहं च परमे
श्वरि पापेन सहितं शुष्कं कृत्वा तेन क्रमेण
तु वह्निबीजेन संदह्य पापेन सहितं शिवे
पापेन सहितं पश्चात्प्लावयेदमृतात्मना
प्राणप्रतिष्ठया पश्चाज्जीवं देहे निधापयेत्
आकारः मुखं हंतं समुच्चार्य हंसः (सकारः) सोहं विपरीततः उद्ध
रेत्परमेशानि विधेयं त्वन्तरा भवेत् प्राणप्र
तिष्ठामंत्रोयं सर्वकर्माणि साधयेत् तेनैव
विधिना देवि स्थिरीकुर्यात्त्रिजो ततो विशुद्ध
देहो देवेशि न्यासं कुर्यात्समाहितः ऋषिर.

समहेशानिदक्षिणामूर्त्तिरव्ययः न्यसेच्छि
रसिपूज्यतात्येकिञ्चिद्दोभवेन्मुखे देवनाहृ
दयेबालात्रिपुरापरमेश्वरी बीजंतुवाग्भ
वंशक्तिस्तार्तीयंकीलकंततः कामराजंम
हेशानिछंदोन्यासउदाहृतः नाभ्यादिपा
दपर्यंतंगलादानाभिवामरे मूर्धादिगलप
र्यंतंमस्तरींविन्यसेत्क्रमात् वामपाणितले
वैकंदक्षपाणितलेतथा उभयोःसंपुटेविद्या
त्रिबीजांविन्यसेत्प्रिये पंचबाणान्क्रमेणैवक
रांगुलिषुविन्यसेत् अंगुष्ठादिकनिष्ठांतंक्रमे
णपरमेश्वरि योनिंहृदयेसमालिख्यवह्निसंस्थक्र
मेणतु मुखवृत्तेननेत्रेणवामेनपरिमंडितं बाला
हृदयमिदंप्रोक्तंवामकर्णविभूषितं बिंदु
नादसमायुक्तंसर्गवांश्चेद्भमाःप्रिये पंचबाण
महेशानिनामानिशृणुपार्वति क्षोभणोद्रा
वणोदेवितथाकर्षणसंज्ञकः वश्योन्मादौ
क्रमेणैवनामानिपरमेश्वरि कामाख्यतंत्रेचवि
ज्ञेयास्त्रिषांबीजानिसंशृणु पराबीजमथ
बाणंवाग्भवंपरमेश्वरि कामाख्यतंत्रेचविज्ञे

मादनंभूमिसंस्थितम्। चतुर्थस्य बिन्दुक्लीं नादयुक्तं वरानने। कान्तं शक्र
समायुक्तं

वा.प.
८

यास्त्वेषांबीजानिसंपृष्टए पराबीजंमध्यबा
एंवामभवंपरमेश्वरि तुर्यंबाएंततश्चैवस्त्रीबी
जंतुक्रमात्प्रिये पंचकामाइमेदेविनामानिपृ
एवल्लभे काममन्मथकन्दर्पम कंधजमेत
कः मीनकेतुमेहेशानिपंचमः परिकीर्तित
एतान्विन्यस्यदेवेशिकरन्यासस्ततः परम्
तलविघांङ्गिराहत्यसर्वांगुलिनलेष्वपि षड
गक्रमयोगेणमातृकांविन्यसेत्ततः मातृका
पृएदेवेशिन्यासात्पापप्रणाशिनी ऋषिर्ब्र
ह्मास्यमंत्रस्यगायत्रंछंदउच्यते देवतामातृ
कादेवीबीजंव्यंजनसेवयः शक्तयस्तुस्वरादेवि
षडंगन्यासमाचरेत् अंआंमध्येकवर्गंतुइंईं
मध्येचवर्गकं उंऊंमध्येटवर्गंतुएंऐंमध्येतव
र्गकं ओंऔंमध्येपवर्गंतुबिंदुयुक्तंन्यसेत्प्रि
ये अनुस्वारविसर्गांतंयशावर्गौसलक्षकौ
हृदयंचशिरोदेविशिखाकवचेनततः नेत्रम
स्त्रन्यसेत्तेननमःस्वाहाक्रमेणतु वषडंतेनवौ
षडंतंफडंतेयोजयेत्प्रिये षडंगोयंमातृकाया
सर्वपापहरःस्मृता अष्टपत्रांबुजेकंठेस्वरान्

षोडशा विन्यसेत् द्वादशाब्जदहृन्मध्ये कादीन्
द्वादश विन्यसेत् दशपत्राम्बुजे नाभौ डकारा
दीन्न्यसेद्दश षट्पत्रे मध्यलिङ्गस्थे बकारादी
न्न्यसेत्षट् स्वाधारे चक्रेवर्णान्वादीन्न्यसेच्च
तुर्दले हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत्प्रि
ये इत्येतन्मातृकान्यासं सर्वाङ्गन्यासमाचरेत्
मूर्ध्नादौ मखवृहन्नेवनेत्रकर्णेषु पार्वेति नासा
गण्डोष्ठदन्तेषु सम्मूर्धास्येषु विन्यसेत् पाणिपा
दयुगसन्धानेसन्ध्यग्रेषु क्रमात्प्रिये पार्श्वद
येपृष्ठनाभिजठरेषु क्रमात्प्रिये यादीन्सप्तधा
तुकान्देवि क्रमेणैव ततो न्यसेत् त्वगसृङ्मांस
मेदोस्थिमज्जाशुक्राणि धातवः प्राणात्मावेव
जीवात्मा परमात्मा च विन्यसेत् हृदये बाहुमू
ले च तथा परगले प्रिये कक्षायां हृदये प्रीतः
पाणिपादयुगे तथा जठराननयोर्देवि व्याप
के चक्रमान्न्यसेत् पञ्चाशद्वर्णरूपां च कपर्दश
शिभूषणां शुद्धस्फटिकसङ्काशां शुद्धक्षौम
विराजितां मुक्ताहारत्नस्फुरद्भूषां जपमालाक
मण्डलं पुस्तकं वरदानं च बिभ्रतीं परमेश्वरी
एवं ध्यात्वा न्यसेत्सम्यग्द्विधान्यासं सुरेश्वरि मंत्री

बा.प.
५

ऊर्वीनसवाहं त्रिभिर्बीजैः क्रमात्प्रिये करयोः
र्विन्यसेदादौ मणिबन्धेन लेयके दक्षेवामेव
विन्यस्य करत्योः कूर्परपाणिषु पुनर्दक्षेचवा
मेच पादयोश्च तथा न्यसेत् नादांते हृदये लिं
गे विन्यसेच्च ततः परं एतेष्वंगेषु देवेशि संहा
रक्रमतो न्यसेत् विपरीतसृष्टिक्रमेणैव जानी
हि परमेश्वरि ततो न्यसेन्महेशानि नवयोः
न्यासकितं विधिं कर्णयोश्चिबुके देवि शंखयो
र्मुखमंडले नेत्रयोर्नासिकायां च वाहुयुग्मह
२= दि प्रिये तथा कूर्परयोः ऊर्वोर्जान्वोर्देवि ग्रीवावि
न्यसेत् पादयोर्देवि गुह्ये च पार्श्वे हृत्स्तन
ह्रये कंठे च नवयोन्याख्यान्यसेद्बीजत्रयात्मि
का षडंगमाचरेद्देवि हृदिराहस्तात्क्रमेण तु त्रि
द्व्येकदशकत्रिद्विसंख्यया शैलसंभवे अंग
लीनां पुनर्देवि बाणान्कामांश्च विन्यसेत्
ललाटे भालहृन्नाभिमूलाधारेषु वै क्रमात्
मूलेन व्यापकं कृत्वा प्राणायामं समाचरेत्
इति श्रीज्ञानार्णवे बालान्यासविधिर्द्वितीयो
ध्यायः श्रीईश्वर उवाच एवं सन्नद्धदेहः सन्स्न
माहितमनास्ततः अंतर्यागविधिं कुर्यात्सा

नुनोरन्धाने
न्यसेत्
नभौ

ल्पाङ्कुल्लमयेप्रिये मूलाधारेमूलविद्यांविद्युत्
कोटिसमप्रभां सूर्यकोटिप्रतीकाशांचंद्रको-
टिप्रभांप्रिये बिसतंतुस्वरूपांतांबिंदुत्रिवल
यांप्रिये ऊर्ध्वशक्तिनिपातेनसहजेनवरानने
मूलशक्तिदृढत्वेनमध्यबीजप्रबोधतः पर
मानंदसंदोहमानंदंचिंतयेत्परं इत्येनयजने
कृत्वाबाह्यपूजांसमाचरेत् ततः प्राङ्मुखा
आसीनश्चक्रोद्धारंसमाचरेत् श्रीपर्णिसंभ
वेपट्टेस्थापयेद्यंत्रमुत्तमे ईशानादग्निपर्यंतमृ
जुरेखांसमाचरेत् ईशादग्नेस्तदग्राभ्यांरेखा
आकृष्यदेशिकः एकीकृत्यचवारुण्यांशक्ति
रेखांपराप्रिये त्रिकोणाकाररेखेयंतस्याउपरि
संलिखेत् त्रिकोणाकाररूपंतुशक्तिद्वयमुदा
हृतम् पूर्वशक्त्यग्रभागेतुमानयाष्टिवदालिखे
त् रेखांतुपरमेशानिवायुरात्तमकोणगां
सन्धिभेदक्रमेणैवतयोःशक्त्योस्ततः परे रे
खेआकृष्यकोणाभ्यांतदग्रात्पूर्वगेऽरुह वह्नि
मंडलमेतत्तुपूर्वाग्रंवीरवंदिते एकेनवह्नि
नाशक्तिद्वयेनैवभवेत्प्रिये नवयोनिविशोभा
ढ्यंचक्रराजमिदंप्रिये सर्वसौभाग्यजननेसर्वे

पृतं

बाप· ६

6

श्वर्यप्रदायकं सर्वसिद्धिप्रदं रोगहरणं पापना
शनं एतद्द्वारेण संलेख्यं हृत्ते ब्रह्माण्डसन्निभे
तन्मध्ये अष्टपत्रे तु ग्रन्थिभिस्त्वष्टभिर्भजेत् ग्रन्थी
श्च प्रणवाभ्यां तु संपुटत्वेन कारयेत् ग्रन्थयः
कुलिशज्ञेयाः प्रणवैरष्टसंवने त्रिशूलाष्ट
कमालिख्य वज्ररत्नं लिखेत्प्रिये वज्रहीरवि
शोभाढ्यं सर्वानंदकरं सदा हसौः कारं त्रिको
णतः संलिख्य वरवर्णिनि कामराजं मध्यमे
तदष्टकोणेषु संलिखेत् स्वराः षोडश देवेशि
युग्मयुग्मप्रभेदतः दलाष्टकेषु संलेख्याः
पश्चिमादिप्रदक्षिणं ग्रन्थिस्थानेषु वर्गाणां
कादीनां परमेश्वरि विलिखेत्सप्तवर्गाणामा
नेकमतः प्रिये लकारमष्टमे योज्यं शेषा
वर्णाः क्रमेण तु मूलाष्टकेषु संलेख्याः प
श्चिमादिक्रमेण तु तद्बाह्ये मातृकावृत्तं वि
लिख्य परमेश्वरि वज्ररत्नमहत्प्राणि मातृकां
कामगर्भिकां विलिख्य पूजयेत्तं हेमरूप्या
दिपट्टके ताम्रे वा दर्पणे स्थाने काश्मीरप्रभ
वे पि वा चंदनेन तथा भूमौ कुंकुमागुरुचंदनैः
सिन्दूररजसा वापि कस्तूरीकुसुमाण्डभिः भू

वालामंत्र मध्यगं वीज मि-मर्थः

वर्णमितिशेषः

वर्गक्रमत इत्यर्थः

जैर्गोरोचनाद्यैः कल्पितेथमानसेथवा स्वर्·
णेरत्नलेखिन्यासर्वकार्यार्थसाधकः विलिख्य
यंत्रेदेवीं शिवपूजाद्रव्याणियोजयेत् कुलागम
क्रमेणैव ध्यात्वाब्रह्मविकासिनीं मूलादिब्र·
ह्मरंध्रान्ते विसतंतुतनीयसीं भ्रमद्भ्रमरनीला
भयाम्मिलामलपाणिणीं ब्रह्मरंध्रस्फुरभित्र· ८
मुखरेखाविराजितां मुखलेखालग्नरत्नति
लकां मुकुरोज्ज्वलां विद्रुमस्फावग्रारुचंद्ररे
खाकिरीटिनीं भ्रमद्भ्रमरनीलाभनयनत्रयरा
जितां सूर्यभास्वन्महारत्नकुंडलालंकृतांप
रां चक्राकारस्फुरन्मुक्ताहारभूषणभूषितां
ग्रैवेयांगदपत्रालिस्फुरत्कांतिजितामृतां ग
गनैरंगकर्पूरशुभ्राम्बरविराजितां श्रीखंडव
ल्लीसटशाबाहुवल्लीविराजितां कंकणादि
लसद्भूषामणिबन्धलसत्प्रभां प्रवालपल्ल
वाकारपाणिपल्लवशोभितां वज्रवैडूर्यमु
क्तालिमेखलां विमलप्रभां रक्तोत्पलदला
कारपादपल्लवशोभितां नक्षत्रमालासं
काशमुक्तामंजीरमंडितां वामेनपाणिनैके

बाप. ७

नमोन्तेस्तकं चापरेणतु अभयं च प्रयच्छन्तीसा
चकानोवरानने अक्षमालां वरं देदत्तपाणिद्व
येन हि दधन्तीं चिंतयेद्देवीं वपुष्पसौभाग्यवाक्प्र
दां लीरऊंदेंड्डयबलोप्रसत्त्रोसेस्मरेत्प्रिये इति
ज्ञानार्णवे षष्ठेत्रोङ्कारध्यानकोडस्तृतीयः पटलः
श्रीदेव्युवाच चक्रमंडलमाख्यातं न पूजा चक्र
मंडले कथितापरमेशान श्रोतुमिच्छामि तत्व
तः श्रीईश्वरउवाच शृणु देवि प्रवक्ष्यामि पूजा
मण्डलमुत्तमं पीठपूजां विधायादौ रविदेवी
विराजितां वामाज्येष्ठा च रौद्री च अंबिके च्छा
ततः परं ज्ञाना क्रियाकुब्जिका च विज्ञा चैव वि
षघ्निका ... तां चैव वानंदादे विद्वादशसंज्ञया
मुक्ताफलामलमणिस्फुरच्छत्रशशिप्रभाः
पूर्वादिपरितः पूज्याः शक्तयः पीठसंस्थिताः
संपूज्य मध्ये देवेशि प्रेतसिंहासने यजेत् र
त्नस्फुरणे कृतिस्फारदीप्तिमत्सकलात्मकं येव प्रे
तासने साक्षात्सोदा दायिन मेशयः अनपच म
हेशानि महाप्रेतासने यजेत् चक्रमध्यस्थितं
बीजं सदाशिवमहापदं प्रेतपद्मासने ह्रैं तहह

रविशब्दो द्वादशार्थकः द्वादशसु देव्यत्व...

त्मनुमेनुरीरितः महाप्रेतस्यमेढ्रोयंकलाणाः
परमेश्वरि सिंहासनेसमभ्यर्च्यततआवाहनेम
न्त्रम् वहन्नाडीक्रमेणैवमूलादिब्रह्मरन्ध्रगां
संवित्कलामहेशानिसर्वेशांसुरसुंदरी आवाह्य
चक्रमध्येतुतर्पयेत्कुलसुंदरी ततःषडंगावर
णपरितःपीठमद्धिजे अग्नीशासुरवायव्यमा
ध्येदिक्षुचपूजयेत् अग्निकोणेरतिंपश्चात्प्री
तिमन्त्रैरपूर्वके मनोभवंदत्तकोणेततोबाणा
न्समर्चयेत् उत्तरस्यांहृदयेदेविदक्षिणस्यांहृदये
ॐमे. दिशि अग्रेचैकैकरेणैवपंचबाणान्क्रमाधनेत्
पंचकामांस्तथादेविबाणवत्परिपूजयेत् अने
गकुसुमोदेवितथानंगादिमेखला अनंगम
धनोपश्चादनंगमदनातुरा सुभगापंचमी
देविभगावभगादर्पिणी भगमालामहादेवि
पूर्वादिक्रमतोयजेत् अष्टयोनिषुदेवेशिततो
ब्रह्म्यादिकायजेत् युग्मयुग्मप्रभेदेनवसुपत्रे
वरानने असितांगंतथाब्राह्मीरुद्रंमाहेश्वरी
प्रिये चंडंकौमारिकांचैववक्रोयंवैस्नवदेवतो
उन्मत्तंचैववाराहीमाहेंद्रीचकपालिनं भीषा
णंचैवचामुंडांसंहारमष्टमेयजेत् कामरूप

कौ=२

चमल्यं ततः कोलगिरिं तथा कालान्तकं च चौ
हारं जालन्धरमतः परं उड्डियानं देवकूटं पीठ
षट्कमिदं क्रमात् ग्रथितं स्थानेषु संपूज्यं पश्चिमा
दिक्रमेणतु त्रिशूलं पवित्रो देवि मातृकाष्ट
कमण्डले भैरवा दश संपूज्याः पश्चिमादिक्रमा
तु=६ त्प्रिये हेतुकं चैव वेतालं तन्मध्ये त्रिपुरान्तकं
अग्निजिह्वं च कालान्तं तथा चैव कपालिनम् ८
एकपादं भीमरूपं मलहां च रैकेश्वरं दशसंख्या
महादेवि भैरवा मातृमण्डले चतुरस्रे महादे
वि लोकपालाष्टकं यजेत् इन्द्रमग्निं यमं देवि
राक्षसं वरुणं तथा वायुं कुबेरमीशानं पूर्वाद
दिक्रमतो यजेत् ब्रह्माणं चैव विष्णुं च ऊर्ध्वाधः
क्रमतो यजेत् वोंकारं बीजमुच्चार्य वटुकाय न
मो लिखेत् योंकारं बीजमुच्चार्य योगिनीभ्यो न
मस्तथा क्षोंकारं बीजमुच्चार्य क्षेत्रपालाय चैव न
मः गोंकारबीजमुच्चार्य तथा गणपतिं लिखेत्
ॐ तेन मः पश्चिमादिदिक्षु पूज्याः क्रमेणतु चतु
रस्रेतु संपूज्या विदिक्षु परमेश्वरि वायव्यादिक्र
मेणैव वक्ष्यमाणा महेश्वरि वसवो द्वादशादित्या
रुद्राश्चैव ततः प्रिये सर्वभूतान्ववाहोहे क्रमेणप

विसृजयेत् सृजो विधाय देवेशि उपचारैः प्रपू
जयेत् उत्तराशामुखो भूत्वा यदा चक्रं प्रपूज-
येत् उदीचीदिक् तदा देवि पूर्वासेव वस्थिता
ता पश्चिमाशामुखो देवि पूर्वासेव निगद्यते
दक्षिणाशामुखो देवि यदा चक्रं प्रपूज्यते द
क्षिणापि तदा देवि पूर्वासेव न संशयः न
त्रैव बलिदानं च कुर्यात्सर्वार्थसिद्धये अने
न विधिना देवि त्वां पूजयेत्परमेश्वरी पंचसिंहा
सनगतां परमानंदरूपिणी पंचसिंहासनो
त्सङ्गो विकलो चिंतयेत्सदा वर्णाल्लक्षं जपेन्मं
त्रं तद्दशांशं हुनेत् प्रिये तर्पणं तत्तथा कुर्या
त्सर्वसौभाग्यवान्भवेत् इति ज्ञानार्णवे पू
जाविधिः पटलश्चतुर्थश्चेति शिवम् ॥ शुभम्

बा.पं.
५

9